विश्वकल्याणम्
|| चतुस्सागर पर्यन्तं गो ब्राह्मणेभ्यः शुभं भवतु ||

# श्री परमेश्वर कृत महाविष्णु स्तोत्रं

जगदीश सुधीश भवेश विभो परमेश परात्पर पूत पित: |
प्रणतं पतितं हत बुद्धि बलं जनतारण तारय तापितकम् || १ ||

गुणहीनसुदीनमलीनमतिं त्वयि पातरि दातरि चापरतिम् |
तमसा रजसावृतवृत्ति मिमं जनतारण तारय तापितकम् || २ ||

मम जीवनमीनमिमं पतितं मरुघोरभुवीह सुवीहमहो |
करुणाब्धि च लोर्मिजला नयनं जनतारण तारय तापितकम् || ३ ||

भववारण कारण कर्मततौ भवसिन्धुजले शिव मग्नमत: |
करुणाञ्च समर्प्य तरिं त्वरितं जनतारण तारय तापितकम् || ४ ||

अतिनाश्य जनुर्मम पुण्यरुचे दुरितौघभरै: परिपूर्णभुव: |
सुजघन्य मगण्य मपुण्यरुचिं जनतारण तारय तापितकम् || ५ ||

भवकारक नारकहारक हे भवतारक पातकदारक हे |
हर शङ्कर किङ्कर कर्मच यं जनतारण तारय तापितकम् || ६ ||

तृषितश्चिरमस्मि सुधां हित मे च्युत चिन्मय देहि वदान्यवर |
अतिमोह वशेन विनष्टकृतं जनतारण तारय तापितकम् || ७ ||

प्रणमामि नमामि नमामि भवं भवजन्म कृतिप्रणिषूदनकम् |
गुणहीनमतन्त मितं शरणं जनतारण तारय तापितकम् || ८ ||

|| इति परमेश्वर कृत महाविष्ण स्तोत्रं सम्पूर्णं ||

www.viswakalyanam.org





With Blessings :
'Mahadacharya' KALYANASASTRY AMANCHI
website : www.viswakalyanam.org, mailid : kalyanasastry@viswakalyanam.org,
17-38(B), Road Behind Ayyappa Temple, Ramamandir Street, CHIRALA,
Pin : 523 155, Prakasam District, (A.P.), INDIA.
India Ph. : 91-9248581234, Usa Ph. : 614+874+9133